# Ganesha Apamarjana Stotram

# गणेशापामार्जनस्तोत्रम्

## Document Information

Text title : Ganesha Apamarjana Stotram

File name : gaNeshApAmArjanastotram.itx

Category : ganesha, apAmArjana, stotra

Location : doc_ganesha

Proofread by : Narendran Madathil

Description/comments : From Vighneshvara-stuti-manjari 4, brahmANDapurANe

Latest update : October 1, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 1, 2026

*sanskritdocuments.org*

Ganesha Apamarjana Stotram

# गणेशापामार्जनस्तोत्रम्

ॐ अस्य श्रीमहागणपत्यपामार्जनस्तोत्रमालामन्त्रस्य ब्रह्मा ऋषिः ।
श्रीमहागणपतिर्देवता । नानाविधानि छन्दांसि । मम सकलदोषरोगशान्तये
दिव्यभौमान्तरिक्षत्रिविधोत्पातशान्तये सर्वाभीष्टफलप्राप्त्यर्थे जपे विनियोगः ।
ॐ गणेशाय गुणेशाय निर्गुणाय गुणात्मने ।
पूर्णाय परमेशाय विघ्नराजाय सम्मुदे ॥ १॥

अरूपबहुरूपाय व्यापिने परमात्मने ।
अकल्मषाय शुद्धाय ध्यातुः पापहराय च ॥ २॥

विनायकाय धाम्ने च मयूरेशाय सर्वशः ।
चिन्तामणिगणेशाय गजदन्तधराय च ॥ ३॥

नमस्कृत्य प्रवक्ष्यामि यथा सिध्यतु मे वचः ।
चतुर्थीतिथिजाताय सर्वसङ्कटहारिणे ॥ ४॥

नमस्कृत्य प्रवक्ष्यामि येन सिध्यतु मे वचः ।
आखुध्वज मयूरेश देवदेव जगत्पते ॥ ५॥

सिद्धिबुद्धिप्रदात्रे च सकलं मे हराशुभम् ।
गणनाथ गणाधीश गजानन गणेश्वर ॥ ६॥

ढुण्ढिराज गदापाणे दन्तायुधधर प्रभो ।
मृत्युबन्धार्तिभयदं दुर्दिष्टस्य च यत्फलम् ॥ ७॥

परापध्यानसहितं प्रयुक्तं चाभिचारिकम् ।
गरस्पर्शमहारोगं प्रयोगं च यथाकृतम् ॥ ८॥

एकाहिकं द्व्याहिकं च त्र्याहिकं च महाज्वरम् ।
चातुर्थिकं पाक्षिकं वा सन्निपातज्वरं तथा ॥ ९॥

दोषमामयसम्भूतमपस्मारभगन्दरम् ।

शिरोरोगं नेत्ररोगं कर्णरोगमथाखिलम् ॥ १० ॥

वाल्मीकं पीनसं हिक्कां सन्धिशूलं क्षयं तथा ।
कासं श्वासं तथा दद्रुं लूताविस्फोटकं तथा ॥ ११ ॥

मेहप्लीहयक्ष्मगुल्मव्यङ्गपिप्लुरुजं पुनः ।
दशदोर्दण्डभृद्देवो महागणपतिः क्षणात् ॥ १२ ॥

हरतु प्रणतः प्राणत्राणकारी शिवात्मजः ।
उक्तानुक्ताश्च ये रोगा ये च जन्मान्तरार्जिताः ॥ १३ ॥

ते सर्वे विलयं यान्तु हेरम्बस्य भयार्दिताः ।
डाकिन्यः पिशिताशिन्यः भूतवैतालिकास्तथा ॥ १४ ॥

सर्वे विलयं यान्तु ढुण्ढिराजभयातुराः ।
स्थावरं जङ्गमं चैव कृत्रिमं चापि यद्विषम् ॥ १५ ॥

दन्तोद्भवं नखोद्भूतमाकाशप्रभवं तथा ।
पिशाचप्रभवं यच्च विषमत्यन्तदुःखहम् ॥ १६ ॥

शमयित्वाशु भगवान् परमात्मा गजाननः ।
ह्रीं क्रौं ॐ नमः । सर्वविघ्नाधिपतये सर्वार्थसिद्धिदाय सर्वदुःखप्रशमनाय एह्येहि भगवन् सर्वदुष्टरोगान् खादय खादय स्तम्भय स्तम्भय स्तम्भय ह्रीं गां नमः स्वाहा ।
क्रौं ह्रीं दुण्ढिमयूरेश नामोच्चारणभेषजात् ।
क्षीयन्तां सकला रोगाः सत्यं सत्यं न संशयः ॥ १७ ॥

ग्रहा बालग्रहाश्चैव पिशाचा यक्षराक्षसाः ।
नश्यन्ति स्मरणादेव महागणपतेः प्रभोः ॥ १८ ॥

अतिसारज्वराः घोराः कूष्माण्डजृम्भकादयः ।
ते सर्वे प्रशमं यान्ति विघ्नराजेन तर्जिताः ॥ १९ ॥

सिंहव्याघ्रवराहोष्ट्रखरमार्जारमूषकाः ।
चौराश्च राजचाराश्च शत्रवो दुष्टचेतसः ॥ २० ॥

ते सर्वे विलयं यान्तु धर्षिता धूमकेतुना ।
प्राच्यां दिशि प्रतीच्यां च दक्षिणोत्तरयोस्तथा ॥ २१ ॥

विदिक्षु दिक्षु सर्वासु हेरम्बः पातु मां सदा ।

उक्तानुक्तस्थले चाव्यात् सदा देवो महोत्कटः ॥ २२॥

स्मरणेन गणेशस्य क्षयमेनांसि यान्ति यत् ।
तेन सत्येन सकलं दुष्टमस्य प्रशाम्यतु ॥ २३॥

यथा विघ्नेश्वरो देवः पुराणेषु प्रगीयते ।
सत्येन तेन सकलं यन्मयोक्तं तथास्तु तत् ॥ २४॥

शमीपत्रैर्गणेशस्य सदा सन्तोषसाधकैः ।
समार्जितं मया गात्रमरोगं भवतु क्षणात् ॥ २५॥

मदोत्कटो गणाध्यक्षो धूमकेतुर्द्विपाननः ।
शान्ताः समस्तरोगास्ते ग्रहाः सर्वविषाणि च ॥ २६॥

भूतानि प्रलयं यान्ति संस्मृते विघ्नसूदने ।
एतत्समस्तरोगेषु भूतग्रहभयेषु च ॥ २७॥

अपामार्जनकं स्तोत्रमिदमस्त्यभिमन्त्रितम् ॥ २८॥

इयं शमी विघ्नगणेश्वरप्रिया गणेश्वरोऽहं स्वयमेव चागतः ।
अस्मिन्नरे दुष्टमशेषमस्ति स्वस्थो भवत्येष गणेशवाक्यतः ॥ २९॥

शान्तिरस्तु शिवं चास्तु दुष्टमस्य प्रशाम्यतु ।
यदस्ति दुरितं किञ्चित्तत्क्षिप्तं लवणाम्भसि ॥ ३०॥

स्वास्थ्यमस्य सदैवास्तु सिद्धिबुद्धीशकीर्तनात् ।
यत्र चैवागतं पापं तत्रैव प्रतिगच्छतु ॥ ३१॥

एतद्रोगादिपीडासु जन्तुना हितमिच्छता ।
गाणेश्वरेण कर्तव्यमपामार्जनकं परम् ॥ ३२॥

अनेन सर्वदुःखानि प्रशमं यान्त्यसंशयः ।
सर्वभूतहितार्थाय कुर्यात्तस्मात्सदैव हि ॥ ३३॥

गणेशप्रियकृत्स्तोत्रं यः पठेत्प्रयतः सदा ।
तस्य रोगा न बाधन्ते सत्यमेतद्ब्रवीम्यहम् ॥ ३४॥

सकृत्पठनमात्रेण भालचन्द्रप्रभावतः ।
अश्वमेधसहस्रस्य फलं प्राप्नोति निश्चितम् ॥ ३५॥

अपामार्जनकं स्तोत्रं गणेशप्रीतिवर्धनम् ।

सकृदुच्चरितं येन तस्य मुक्तिः करे स्थिरा ॥ ३६॥

सुमुखस्तवराजोऽयं मुखे यस्य विराजते ।
सुमुखीभूय सद्योऽसौ निजलोकं स गच्छति ॥ ३७॥

इयं सञ्जीवनी विद्या देवानामपि दुर्लभा ।
अभिषिक्तो यया जन्तुः मृत्युग्रस्तोऽपि जीवति ॥ ३८॥

प्रसन्नेन गणेशेन मह्यमुक्तस्तवो ह्यसौ ।
लोकोपरि दयां कृत्वा मया तुभ्यं प्रकाश्यते ॥ ३९॥

इति ब्रह्माण्डपुराणे गणेशापामार्जनस्तोत्रं सम्पूर्णम् ।

Proofread by Narendran Madathil

*Ganesha Apamarjana Stotram*

pdf was typeset on October 1, 2026

Please send corrections to *sanskrit@cheerful.com*